# ॥ वाल्मीकि रामायण ॥

## ६ युद्धकाण्ड

### अध्याय ११५

श्रुत्वा तु परमानन्दं भरतः सत्यविक्रमः ।
हृष्टमाज्ञापयामास शत्रुघ्नं परवीरहा ॥ १ ॥

दैवतानि च सर्वाणि चैत्यानि नगरस्य च ।
सुगन्धमाल्यैर्वादित्रैरर्चन्तु शुचयो नराः ॥ २ ॥

राजदारास्तथामात्याः सैन्याः सेनागणाङ्गनाः ।
अभिनिर्यान्तु रामस्य द्रष्टुं शशिनिभं मुखम् ॥ ३ ॥

भरतस्य वचः श्रुत्वा शत्रुघ्नः परवीरहा ।
विष्टीरनेकसाहस्रीश्चोदयामास वीर्यवान् ॥ ४ ॥

समीकुरुत निम्नानि विषमाणि समानि च ।
स्थानानि च निरस्यन्तां नन्दिग्रामादितः परम् ॥ ५ ॥

सिञ्चन्तु पृथिवीं कृत्स्नां हिमशीतेन वारिणा ।
ततोऽभ्यवकिरंस्त्वन्ये लाजैः पुष्पैश्च सर्वतः ॥ ६ ॥

समुच्छ्रितपताकास्तु रथ्याः पुरवरोत्तमे ।
शोभयन्तु च वेश्मानि सूर्यस्योदयनं प्रति ॥ ७ ॥

स्रग्दाममुक्तपुष्पैश्च सुगन्धैः पञ्चवर्णकैः ।
राजमार्गमसम्बाधं किरन्तु शतशो नराः ॥ ८ ॥

मत्तैर्नागसहस्रैश्च शातकुम्भविभूषितः ।
अपरे हेमकक्ष्याभिः सगजाभिः करेणुभिः ।
निर्ययुस्त्वरया युक्ता रथैश्च सुमहारथाः ॥ ९ ॥

ततो यानान्युपारूढाः सर्वा दशरथस्त्रियः ।
कौसल्यां प्रमुखे कृत्वा सुमित्रां चापि निर्ययुः ॥ १० ॥

अश्वानां खुरशब्देन रथनेमिस्वनेन च ।
शङ्खदुन्दुभिनादेन सञ्चचालेव मेदिनी ॥ ११ ॥

कृत्स्नं च नगरं तत्तु नन्दिग्राममुपागमत् ।
द्विजातिमुख्यैर्धर्मात्मा श्रेणीमुख्यैः सनैगमैः ॥ १२ ॥

माल्यमोदक हस्तैश्च मन्त्रिभिर्भरतो वृतः ।
शङ्खभेरीनिनादैश्च बन्दिभिश्चाभिवन्दितः ॥ १३ ॥

आर्यपादौ गृहीत्वा तु शिरसा धर्मकोविदः ।
पाण्डुरं छत्रमादाय शुक्लमाल्योपशोभितम् ॥ १४ ॥

शुक्ले च वालव्यजने राजार्हे हेमभूषिते ।
उपवासकृशो दीनश्चीरकृष्णाजिनाम्बरः ॥ १५ ॥

भ्रातुरागमनं श्रुत्वा तत्पूर्वं हर्षमागतः ।
प्रत्युद्ययौ तदा रामं महात्मा सचिवैः सह ॥ १६ ॥

समीक्ष्य भरतो वाक्यमुवाच पवनात्मजम् ।
कच्चिन्न खलु कापेयी सेव्यते चलचित्तता ।
न हि पश्यामि काकुत्स्थं राममार्यं परन्तपम् ॥ १७ ॥

अथैवमुक्ते वचने हनूमानिदमब्रवीत् ।
अर्थं विज्ञापयन्नेव भरतं सत्यविक्रमम् ॥ १८ ॥

सदा फलान्कुसुमितान्वृक्षान्प्राप्य मधुस्रवान् ।
भरद्वाजप्रसादेन मत्तभ्रमरनादितान् ॥ १९ ॥

तस्य चैष वरो दत्तो वासवेन परन्तप ।
ससैन्यस्य तदातिथ्यं कृतं सर्वगुणान्वितम् ॥ २० ॥

निस्वनः श्रूयते भीमः प्रहृष्टानां वनौकसाम् ।
मन्ये वानरसेना सा नदीं तरति गोमतीम् ॥ २१ ॥

रजोवर्षं समुद्भूतं पश्य वालुकिनीं प्रति ।
मन्ये सालवनं रम्यं लोलयन्ति प्लवङ्गमाः ॥ २२ ॥

तदेतद्दृश्यते दूराद्विमलं चन्द्रसंनिभम् ।
विमानं पुष्पकं दिव्यं मनसा ब्रह्मनिर्मितम् ॥ २३ ॥

रावणं बान्धवैः सार्धं हत्वा लब्धं महात्मना ।
धनदस्य प्रसादेन दिव्यमेतन्मनोजवम् ॥ २४ ॥

एतस्मिन्भ्रातरौ वीरौ वैदेह्या सह राघवौ ।
सुग्रीवश्च महातेजा राक्षसेन्द्रो विभीषणः ॥ २५ ॥

ततो हर्षसमुद्भूतो निस्वनो दिवमस्पृशत् ।
स्त्रीबालयुववृद्धानां रामोऽयमिति कीर्तितः ॥ २६ ॥

रथकुञ्जरवाजिभ्यस्तेऽवतीर्य महीं गताः ।
ददृशुस्तं विमानस्थं नराः सोममिवाम्बरे ॥ २७ ॥

प्राञ्जलिर्भरतो भूत्वा प्रहृष्टो राघवोन्मुखः ।
स्वागतेन यथार्थेन ततो राममपूजयत् ॥ २८ ॥

मनसा ब्रह्मणा सृष्टे विमाने लक्ष्मणाग्रजः ।
रराज पृथुदीर्घाक्षो वज्रपाणिरिवापरः ॥ २९ ॥

ततो विमानाग्रगतं भरतो भ्रातरं तदा ।
ववन्दे प्रणतो रामं मेरुस्थमिव भास्करम् ॥ ३० ॥

आरोपितो विमानं तद्भरतः सत्यविक्रमः ।
राममासाद्य मुदितः पुनरेवाभ्यवादयत् ॥ ३१ ॥

तं समुत्थाप्य काकुत्स्थश्चिरस्याक्षिपथं गतम् ।
अङ्के भरतमारोप्य मुदितः परिषष्वजे ॥ ३२ ॥

ततो लक्ष्मणमासाद्य वैदेहीं च परन्तपः ।
अभ्यवादयत प्रीतो भरतो नाम चाब्रवीत् ॥ ३३ ॥

सुग्रीवं कैकयी पुत्रो जाम्बवन्तं तथाङ्गदम् ।
मैन्दं च द्विविदं नीलमृषभं चैव सस्वजे ॥ ३४ ॥

ते कृत्वा मानुषं रूपं वानराः कामरूपिणः ।
कुशलं पर्यपृच्छन्त प्रहृष्टा भरतं तदा ॥ ३५ ॥

विभीषणं च भरतः सान्त्वयन्वाक्यमब्रवीत् ।
दिष्ट्या त्वया सहायेन कृतं कर्म सुदुष्करम् ॥ ३६ ॥

शत्रुघ्नश्च तदा राममभिवाद्य सलक्ष्मणम् ।
सीतायाश्चरणौ पश्चाद्ववन्दे विनयान्वितः ॥ ३७ ॥

रामो मातरमासाद्य विषण्णं शोककर्शिताम् ।
जग्राह प्रणतः पादौ मनो मातुः प्रसादयन् ॥ ३८ ॥

अभिवाद्य सुमित्रां च कैकेयीं च यशस्विनीम् ।
स मातॄश्च तदा सर्वाः पुरोहितमुपागमत् ॥ ३९ ॥

स्वागतं ते महाबाहो कौसल्यानन्दवर्धन ।
इति प्राञ्जलयः सर्वे नागरा राममब्रुवन् ॥ ४० ॥

तन्यञ्जलिसहस्राणि प्रगृहीतानि नागरैः ।
आकोशानीव पद्मानि ददर्श भरताग्रजः ॥ ४१ ॥

पादुके ते तु रामस्य गृहीत्वा भरतः स्वयम् ।
चरणाभ्यां नरेन्द्रस्य योजयामास धर्मवित् ॥ ४२ ॥

अब्रवीच्च तदा रामं भरतः स कृताञ्जलिः ।
एतत्ते रक्षितं राजन्राज्यं निर्यातितं मया ॥ ४३ ॥

अद्य जन्म कृतार्थं मे संवृत्तश्च मनोरथः ।
यस्त्वां पश्यामि राजानमयोध्यां पुनरागतम् ॥ ४४ ॥

अवेक्षतां भवान्कोशं कोष्ठागारं पुरं बलम् ।
भवतस्तेजसा सर्वं कृतं दशगुणं मया ॥ ४५ ॥

तथा ब्रुवाणं भरतं दृष्ट्वा तं भ्रातृवत्सलम् ।
मुमुचुर्वानरा बाष्पं राक्षसश्च विभीषणः ॥ ४६ ॥

ततः प्रहर्षाद्भरतमङ्कमारोप्य राघवः ।
ययौ तेन विमानेन ससैन्यो भरताश्रमम् ॥ ४७ ॥

भरताश्रममासाद्य ससैन्यो राघवस्तदा ।
अवतीर्य विमानाग्रादवतस्थे महीतले ॥ ४८ ॥

अब्रवीच्च तदा रामस्तद्विमानमनुत्तमम् ।
वह वैश्रवणं देवमनुजानामि गम्यताम् ॥ ४९ ॥

ततो रामाभ्यनुज्ञातं तद्विमानमनुत्तमम् ।
उत्तरां दिशमुद्दिश्य जगाम धनदालयम् ॥ ५० ॥

पुरोहितस्यात्मसमस्य राघवो
बृहस्पतेः शक्र इवामराधीअफ् ।
निपीड्य पादौ पृथगासने शुभे
सहैव तेनोपविवेश वीर्यवान् ॥ ५१ ॥

The files in this directory are revised versions of the digital files produced by Professor Muneo Tokunaga, Kyoto University, and copyrighted by him. I am grateful to Professor Tokunaga for his agreement to this use of his original files and for permitting the revised versions to be made

publicly available.
Dr J. D. Smith ; email: jds10@cam.ac.uk ; http://bombay.oriental.cam.ac.uk/index.html

---

ITRANS conversion questions to: Avinash Chopde ¡avinash@acm.org¿

---

Last updated on March 25, 1998; Send corrections to sanskrit@cheerful.com